पथिश्रान्तः श्रमक्षीणः बालश्रीः सुकुमारकः।
एतेषां मध्यमा संज्ञा प्रोच्यते वैद्यकागमे।
मध्यमः सप्ततिं यावत् परतो वृद्ध उच्यते॥"
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥
"बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥"
इति च सुश्रुते सूत्रस्थाने ३५ अध्याये॥)

मध्यमपाण्डवः, पुं, (मध्यमश्चासौ पाण्डवश्चेति। तस्य पूर्व्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात्तथात्वम्।) अर्ज्जुनः। इति जटाधरः॥ (यथा, किराताज्जुनीये। १। ४६। श्लोकस्य टीकायां मल्लिनाथः।
"नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजः॥",

मध्यमलोकः, पुं, (मध्यमश्चासौ लोकश्चेति कर्म्मधारयः।) पृथिवी। इति त्रिकाण्डशेषः॥ (यथा, रघुः। २। १६।
"तां देवता पित्रतिथिक्रियार्था-
मन्वक् ययौ मध्यमलोकपालः॥"
"मध्यमलोकपालः भूपालः।" इति तट्टीकायां मल्लिनाथः॥)

मध्यमभृतकः, पुं, (मध्यमश्चासौ भृतकश्चेति।) कृषीबलभृतकः। कृषाण इति भाषा॥ यथा,—
"उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीबलः।
अधमो भारवाही स्यादित्येष त्रिविधो भृतः॥"
इति मिताक्षरा॥

मध्यमसंग्रहः पुं, (मध्यमश्चासौ संग्रहश्चेति।) स्त्रीसंग्रहणाख्यविवादविशेषः। स तु गन्धमाल्यवस्त्रभूषादिप्रेरणरूपः। यथा। प्रथमसाहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विवृतम्।
"त्रिविधं तत् समाख्यातं प्रथमं मध्यमोत्तमम्।
अदेशकालभाषाभिर्निर्जने च परस्त्रियाः।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम्॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम्।
प्रलोभनञ्चान्नपानैर्मध्यमं समुदाहृतम्॥
सहासनं विविक्तेषु परस्परमपाश्रयः।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम्॥"
इति मिताक्षरायां स्त्रीसंग्रहणप्रकरणम्॥

मध्यमसाहसं, क्ली, (सहसा क्रियमाणं कृतं वा। सहसा + अण्। मध्यमञ्च तत् साहसञ्चेति।) बलदर्पितेन वासःपश्वन्नपानादीनामभङ्गाक्षेपोपमर्दादिरूपं सहसा क्रियमाणं कर्म्म। यथा,
"फलमूलोदकादीनां क्षेत्रोपकरणस्य च।
भङ्गाक्षेपोपमर्द्दाद्यैः प्रथमं साहसं स्मृतम्।
वासःपश्वन्नपानानां गृहोपकरणस्य च।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्॥"
इति मिताक्षरा॥

मध्यमसाहसः, पुं, (मध्यमश्चासौ साहसश्चेति।) दण्डविशेषः। स तु पञ्चशतपणरूपः। यथा,—
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमं पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः॥
लोभात् सहस्रं दण्ड्यन्तु मोहात् पूर्व्वन्तु साहसम्।
भयाद्द्वा मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम्॥"
इति मानवे साक्षिप्रकरणे ८ अध्यायः॥

मध्यमा स्त्री, (मध्यम + टाप्।) दृष्टरजस्का नारी। कर्णिका। अङ्गुलिभेदः। त्र्यक्षरच्छन्दः। इति मेदिनी। मे, ५०॥ हृदयोत्थितवुद्ध्यतनाडिरूपवर्णः। यथा, अलङ्कारकौस्तुभः॥
"पश्चात् [illegible] हृदयगो बुद्धियुङ्मध्यमाख्यः।"
स्वीयाद्यन्तर्गतनायिकाभेदः। तस्या लक्षणम्। हिताहितकारिण्यपि प्रियतमे हिताहितकारिणी या सा। अस्यास्तु व्यवहारानुसारिणी चेष्टा। इति रसमञ्जरी॥ (जम्बुभेदः। तत्पर्यायो यथा,—
"सूक्ष्मकृष्णफलाजम्बुर्दीर्घपत्रा च मध्यमा॥"
इति वैद्यकरत्नमालायाम्॥)

मध्यमिका, स्त्री, (मध्यमैव। कन् टापि अत इत्वञ्च।) दृष्टरजस्का नारी। इति रत्नावली॥

मध्यमीयं, त्रि, (मध्यमे भवं मध्यमस्येदं वेति। "गहादिभ्यश्च।" ४। २। १३८। इति छः।) मध्यभम्। इति हेमचन्द्रः। ६। ६६॥

मध्यमेश्वरः, पुं, (मध्यमस्य स्थानस्य ईश्वरः।) काशीस्थशिवलिङ्गविशेषः। यथा,—
"धन्यास्तु खलु ते विप्रा मन्दाकिन्यां कृतोदकाः।
अर्च्चयन्ति महादेवं मध्यमेश्वरमीश्वरम्॥
स्नानं दानं तपः श्राद्धं पिण्डनिर्व्वापणं त्विह।
एकैकशः कृतं विप्राः पुनन्त्यासप्तमं कुलम्॥
सन्निहित्या अपस्पृश्य राहुग्रस्ते निशाकरे।
यत् फलं लभते मर्त्यस्तस्मादष्टगुणं त्विह॥
एवमुक्ता महायोगी मध्यमे शान्तिके प्रभुः।
उवास सुचिरं कालं पूजयन् वै महेश्वरम्॥"
इति कौर्म्मे ३१ अध्यायः॥

मध्ययवः, पुं, (मध्यो मध्यमो यवः।) षट्श्वेतसर्षपपरिमाणम्। इति केचित्॥

मध्यरात्रः, पुं, (मध्यं रात्रेः "पूर्व्वापराधरेति।" २। २। १। इति समासः। "अहःसर्व्वैकेति।" इति ५। ४। ८७। समासान्तोऽच् पुंस्त्वञ्च।) निशीथः। अर्द्धरात्रः। इति हलायुधः॥ (यथा मनौ। ४। १०९।
"उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत्॥")

मध्यलोकः, पुं, (मध्यश्चासौ लोकश्चेति।) पृथिवी। मर्त्यलोक इति यावत्। वक्ष्यमाणशब्दार्थदर्शनात्॥

मध्यलोकेशः, पुं, (मध्यलोकानां मर्त्यानां ईशः।) राजा। इति हेमचन्द्रः। ३। ३५३॥

मध्यस्थः, त्रि, (मध्ये वादिप्रतिवादिनोरन्तरे तिष्ठतीति। स्था + कः।) मध्यस्थायी। तत्पर्य्यायः। निस्सृष्टः २। इति त्रिकाण्डशेषः॥ (यथा कथासरित्सागरे। १०। १६१।
"निषिद्धवत्या मध्यस्थान्दस्यून्नानन्दपूर्णया।
स श्रीदत्तस्तया साकं तन्मन्दिरमथाविशत्॥"
यथा च भागवते। ६। १६। ५।
"बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः।
सर्व्व एव हि सर्व्वेषां भवन्ति क्रमशो मिथः॥")
उभयपक्षहीनः। यथा,—
"श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः।
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल॥"
इति श्रीभागवते १० स्कन्धे ७८ अध्यायः॥
स्वार्थाविरोधेन परार्थघटकः। यथाह प्राञ्चः।
"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य वाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥"

मध्यस्थलं, क्ली, (मध्यं स्थलम्। शरीरमध्यवर्त्तित्वात्तथात्वम्।) कटिदेशः। यथा,—
"कुचौ मरिचसन्निभौ सुरजमध्यमध्यस्थली।
अहो तिमिरमञ्जरी सहचरी नरीनृत्यते॥"
इत्युद्भटः॥

मध्या, स्त्री, (मध्य + टाप्।) मध्यमाङ्गुलिः। इति हेमचन्द्रः॥ नायिकाविशेषः। अस्या लक्षणम्। समानलज्जामदना। एषैव चातिप्रश्रयादतिविश्रब्धनवोढा॥ अस्याश्चेष्टा। सागसि प्रेयसि धैर्य्ये वक्रोक्तिरधैर्य्ये परुषवाक्। यथा,—
"स्वापे प्रियाननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः।
इत्थं सरोरुहमुखी परिचिन्तयन्ती
स्वापं विधातुमपि हातुमपि प्रपेदे॥"
मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे। धीरा अधीरा धीराधीरा चेति। इति रसमञ्जरी॥

मध्याह्नः, पुं, (मध्यं अह्नः समासान्तः टच्। "अह्नोऽह्न एतेभ्यः।" ५। ४। ८८। इत्यह्नादेशः पुंस्त्वञ्च।) अह्नोऽष्टममुहूर्त्तात्मकमध्यभागः। स च कुतपकालस्य संज्ञाविशेषः। यथा,—
"अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः।
मध्याह्ने सर्व्वदा यस्मान्मन्दीभवति भास्करः।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते॥
मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम्।
रौप्यं दर्भास्तिला गावो दौहित्रं चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः।
अष्टावेते यतस्तस्मात् कुतपा इति संस्मृताः॥"
इति मत्स्यपुराणे श्राद्धकल्पे २२ अध्यायः॥
त्रिधाविभक्तदिनमध्यभागः। स च दशदण्डात् परं दशदण्डरूपः। इति स्मृतितत्त्वः अमरोक्तञ्च॥
पञ्चधाविभक्तदिनतृतीयभागः। स तु द्वादश-